ஓம்
ஸ்ரீகுருப்யோ நம:

# ஸ்ரீகுருபூஜா விதானம்



பூஜ்யஸ்ரீ ஓங்காரானந்த மஹாஸ்வாமிகள் அதிஷ்டானம்

வேதபுரீ,தேனி.

# श्री गुरुपूजा विधानम्

## १.प्रार्थना

ओं श्री गणेशाय नमः। ओं श्री गुरवे दत्तात्रेयाय नमः। ओं शारदायै नमः। ओंमातापितृभ्यां नमो नमः। ओं इष्टदेवताभ्यो नमो नमः। ओं दिग्देवताभ्यो नमो नमः। ओं समस्त त्रयस्त्रिंशत्कोटिदेवताभ्यो नमो नमः। ओं गङ्गादि नदी तीर्थक्षेत्र देवताभ्यो नमो नमः। ओं आदित्यादि नवग्रहदेवताभ्यो नमो नमः। ओं वास्तु पुरुषाय नमो नमः। ओं गृहदेव्यै नमो नमः। ओं गोमात्रे नमो नमः। ओं स्थावर जङ्गमेभ्यो नमो नमः। ओं ब्राह्मणेभ्यो नमो नमः। ओं सत्पुरुषेभ्यो नमो नमः ।।

## २.गुरुवन्दनम्

श्रीनाथादि गुरुत्रयं गणपतिं पीठत्रयं भैरवं

सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।

वीरान् ह्यष्टचतुष्कषष्टिनवकं वीरावली पञ्चकं

श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ।।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं

वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम्।

प्रसन्नवदनेक्षणं सकलदेवतारूपिणं

भजे शिरसि हंसकं तदभिधानपूर्वं गुरुम् ।।

श्रीदत्तदेवं ह्यवधूतहंसं श्रीरामकृष्णञ्च सदाशिवेन्द्रम्।

स्वयंप्रकाशाख्यमुनिप्रकाण्डं अस्मद्गुरून् सन्ततमानतोस्मि ।।

शान्तं दान्तं तपोनिष्ठं शान्तानन्दयतीश्वरम् ।

नमामि तं मुनिश्रेष्ठं ह्यवधूतमहर्निशम् ।।

सर्वदेवकृतावासं सर्वलोकनमस्कृतम् ।

कृपावतारं लोकेश्याः ह्यवधूतमुपास्महे ।।

ओङ्कारानन्दब्रह्मेन्द्रं ओङ्कारतत्त्वदर्शिनम् ।

अवधूतमहं वन्दे ज्ञाननिर्धूतकल्मषम् ।।

**३.घण्टा नादं कृत्वा**

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।

घण्टानादं करोम्यादौ देवताह्वानलाञ्चनम् ।।

**४.भूमिपूजा**

विष्णु शक्ति समुत्पन्ने शंख वर्णे महीतले,

अनेक रत्न संपन्ने भूमि देवी नमस्ते।

**५.आसनपूजा**

पृथ्वी त्वाया धृत लोका देवी त्वं विष्णुणा धृता

त्वञ्च धारय मां देवी पवित्रं कुरु चासनम्।

**६.सङ्कल्पः**

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं शुभे दिने, शोभने मुहूर्ते, आद्यब्रह्मणः द्वितीयपरार्धे, श्वेतवराहकल्पे, वैवस्वतमन्वन्तरे, अष्टाविंशतितमे, कलियुगे प्रथमेपादे, जम्बूद्वीपे, भारतवर्षे, भरतखण्डे, मेरोः दक्षिणे पार्श्वे, शकाब्दे, अस्मिन् वर्तमाने व्यावहारिके प्रभवादीनां षष्ट्याः सम्वत्सराणां मध्ये.......नाम सम्वत्सरे......अयने..........ऋतौ,......... मासे........पक्षे.........शुभतिथौ शुभतिथौ ..........वासरयुक्तायां ...................... नक्षत्रयुक्तायां शुभयोग शुभकरण एवं गुण विशेषेण विशिष्टायां अस्यां वर्तमानायां ....... शुभतिथौ ................अस्माकं सर्वेषां

## ७. कलशं गन्धपुष्पाक्षतैः अलङ्कृत्य

ओं गङ्गायै नमः। ओं यमुनायै नमः। ओं गोदावयै नमः। ओं सरस्वत्यै नमः। ओं नर्मदायै नमः। ओं सिन्धवे नमः। ओं कावेर्यै नमः। ओं सप्तसमुद्रदेवताभ्यो नमो नमः ।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः ।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।

कुक्षो तु सागराःसर्वेसप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।।

अङ्गैश्च सहिताः सर्वेकलशाम्बुसमाश्रिताः ।

आयान्तु श्री दत्तात्रेय पादुकापूजार्थं दुरितक्षयकारकाः ।।

गङ्गे च यमुने चैव गोदावरी सरस्वती

नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु ।।

गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा

कावेरी सरयूर्महेन्द्रतनया चर्मन्वती वेदिका ।

क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी

पूर्णा पूर्णजलैः समुद्रसहिताः कुर्वन्तु वो मङ्गलम् ।।

## ८.शङ्खपूजा

शङ्खं प्रक्षाल्य, शङ्खं जलेन पूरयित्वा, गन्धपुष्पाक्षतैः अलङ्कृत्य

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।

पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ।।

ओं पाञ्चजन्याय विद्महे। पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयोत्।। (त्रिवारम्)

शङ्ख जलं किञ्चित् कलशे निक्षिप्य, किञ्चित् करे निक्षिप्य,पूजाद्रव्याणि संप्रोक्ष्य, आत्मानञ्च प्रोक्ष्य।

## ९.पुनः शङ्खपूजा

शङ्खं चन्द्रार्कदैवत्यं कुक्षौ वरुणदेवता।

पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ।।

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे।

पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते।।

पाञ्चजन्याय विद्महे। पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयात् ।। (त्रिवारम्)

शङ्खं देवतायाः पुरतः संस्थाप्य।

ओं पाञ्चजन्याय नमः। ओं शङ्खराजाय नमः।। समस्तोपचारान् समर्पयामि।

## १०.आत्मपूजा

आत्मानं गन्धपुष्पाक्षतैः अलङ्कृत्य

ओं आत्मने नमः। ओं अन्तरात्मने नमः। ओं जीवात्मने नमः। ओं ज्ञानात्मने नमः। ओं परमात्मने नमः।।

पुष्पं शिरसि धारयेत्

आराधितो मनुष्यैस्तु सिद्धैर्देवैः सुरादिभिः।

आराधयामि भक्त्या त्वां अनुग्रहाण महेश्वर।।

आराधयामि मणिसन्निभमात्मलिङ्गं

मायापुरी हृदयपङ्कजसन्निविष्टम्।

श्रद्धानदी विमलचित्तजलाभिषेकैः

नित्यं समाधिकुसुमैर्न पुनर्भवाय।।

ओं आत्मने नमः। समस्तोपचारान् समर्पयामि।

## ११.मण्टप ध्यानम्

हेमैः स्तम्बविचित्रैश्च वज्रमाणिक्यरत्नकैः।

संयुतं मण्टपं दीप्तं हृत्कल्पितमिमं गुरो।।

चूतपत्रादिभिर्युक्तैः नारिकेलादिपूरकैः।

कदलीवृक्षपुष्पैश्च रञ्जितो मण्टपो गुरो।।

स्वामिन्नागत्य संवीक्ष्य भक्तानुग्रहहेतुना।

स्वस्थानं सुस्थिरं कृत्वा पूजां गृह्णीष्व दत्त भोः।।

## १२.अत द्वारपालपूजा

ओं इन्द्राय नमः। ओं अग्नये नमः । ओं यमाय नमः। ओं निर्ऋतये नमः। ओं वरुणाय नमः। ओं वायवे नमः। ओं सोमाय नमः। ओं ईशानाय नमः। ओं ब्रह्मणे नमः। ओं विष्णवे नमः। ओं ऊर्ध्वाय नमः।ओं अधराय नमः। ओं दिग्पालदेवताभ्यो नमो नमः ।।

## अन्तः

पूर्वद्वारे द्वारश्रियै नमः। ज्ञानाय नमः। वैराग्याय नमः।

दक्षिणद्वारे द्वारश्रियै नमः। श्रद्धायै नमः। भक्त्यै नमः।

पश्चिमद्वारे द्वारश्रियै नमः। विद्यायै नमः। विनायायै नमः।

उत्तरद्वारे द्वारश्रियै नमः। विवेकाय नमः। विजयाय नमः।

## १३.पीठपूजा

ओं आधारशक्त्यै नमः। ओं मूलप्रकृत्यै नमः। ओं सर्वाधार पुरुषाय नमः। ओं सप्त समुद्रेभ्यो नमः। ओं सप्तद्वीपेभ्यो नमः। ओं पृथिव्यादिसप्तलोकेभ्यो नमः। ओं अनन्तासनाय नमः। ओं कूर्मासनाय नमः। परमसुखासनाय नमः। अष्टदिग्गजेभ्यो नमः। सुवर्णरत्नपुष्पालङ्कृतभद्रपीठाय नमो नमः।।

## १४.ध्यानम्

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं,

द्वन्द्वातीतं गगनसदृशं तत्तवमस्यादिलक्ष्यम्।

एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं,

भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि।।

ब्रह्मविद्याप्रदातारं सद्गुरुं ध्यायामि।। आवाहयामि।।

## १५.आसनम्

ईश्वरो गुरुरात्मेति, मूर्तिभेदविभागिने।

व्योमवद्व्याप्तदेहाय, दक्षिणामूर्तये नमः ।।

सर्वव्यापिने सद्गुरवे नमः, आसनं समर्पयामि।।

## १६.पूर्णकुम्भः

अन्तः पूर्णो बहिः पूर्णः, पूर्णकुम्भ इवार्णवे।

अन्तः शून्यो बहिः शून्यः, शून्यकुम्भ इवाम्बरे।।

पूर्णाय सद्गुरवे नमः, पूर्णकुम्भं समर्पयामि।।

## १७.पाद्यम्

यत्पादपङ्कजद्वन्द्व - ग्रहणेन मुमुक्षवः।

तुरीयं पादमीप्सन्ति तस्मै श्रीगुरवे नमः ।।

तुरीयपादप्रापकाय सद्गुरवे नमः, पाद्यं समर्पयामि।।

## १८.अर्घ्यम्

अलब्ध्वातिशयं यस्माद्, व्यावृत्तास्तमबादयः।

गरीयसे नमस्तस्मै, अविद्याग्रन्थिभेदिने।।

अविद्यानाशकाय सद्गुरवे नमः अर्घ्यं समर्पयामि।।

## १९.आचमनम्

यत्पादपांसवः सन्तः केऽपि संसारवारिधेः

सेतुबन्धाय कल्पन्ते देशिकं तमुपास्महे।

अनन्दैकस्वरूपिणेसद्गुरवे नमः आचमनीयं समपर्यामि।

## २०.स्नानम्

यच्छुद्धवाक्यतीर्थेषु, स्नाताः पुण्या मुमुक्षवः।

विरजा ब्रह्म गच्छन्ति, तस्मै श्रीगुरवे नमः।।

महावाक्योपदेशकर्त्रे सद्गुरवे नमः, स्नानं समर्पयामि।।

## २१.वस्त्रम्

मूलं तरोः केवलमाश्रयन्तः पाणिद्वयं भोक्तुममत्रयन्तः।

कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः।।

कृतकृत्याय सद्गुरवे मनः, वस्त्रं समर्पयामि।। भस्मादिकञ्च समर्पयामि।।

## २२.गन्धः

विप्राणां विनयो ह्येषः, शमः प्राकृत उच्यते।

दमः प्रकृतिदान्तत्वाद्, एवं विद्वाञ्शमं व्रजेत्।।

प्रकृतिशान्ताय सद्गुरवे नमः, शीतान्गन्धान्समर्पयामि।।

## २३.कुङ्कुमम्

श्रोत्रियोऽवृजिनोऽकाम - हतो यो ब्रह्मवित्तमः।

ब्रह्मण्युपरतः शान्तः, निरिन्धन इवानलः।।

विरक्ताय सद्गुरवे मनः, हरिद्राकुङ्कुमं समर्पयामि।।

## २४.पुष्पमाला

येन षड्लिङ्गसूत्रेण, कृता तात्पर्यमालिका।

वेदान्तवाक्यपुष्पेभ्यः, तस्मै श्रीगुरवे नमः।।

वेदान्ततात्पर्यबोधकाय सद्गुरवे नमः, पुष्पमालिकां समर्पयामि।।

## २५.अर्चना

भावाद्वैतं सदा कुर्यात्, क्रियाद्वैतं न कर्हिचित् ।

अद्वैतं त्रिषु लोकेषु, नाद्वैतं गुरुणा सह।।

परमपूज्याय सद्गुरवे नमः, पुष्पैः पूजयामि।।

## २६.ध्यानम्

नारायणं पद्मभुवं वसिष्ठं , शक्तिञ्च तत्पुत्रपराशरञ्च।

व्यासं शुकं गौडपदं महान्तं, गोविन्दयोगीन्द्रमथास्य शिष्यम्।।

श्रीशङ्काराचार्यमथास्य पद्म-पादञ्च हस्तामलकञ्च शिष्यम्।

**तं तोटकं वार्तिककारमन्यान्, अस्मद्गुरुन्सन्ततमानतोऽस्मि।।**

**सदाशिवसमारम्भां, शङ्काराचार्यमध्यमाम्।**

**अस्मादाचार्यपर्यन्तां, वन्दे गुरुपरम्पराम्।।**

**श्रीदक्षिणामूर्तिसुदेशिकेन्द्रं, द्वैपायनं सूत्रकृतं मुनीन्द्रम्।**

**श्रीशङ्करं भाष्यकृतं यतीन्द्रं, मद्देशिकश्चापि नमामि वित्त्यै।।**

**वेदवेदान्तशास्त्रज्ञं धर्मरक्षणनायकम् ।**
**चिद्भवानन्दशिष्यं तं परंसन्मार्गदर्शिनम् ॥**
**अपारकरुणापात्रं वेदपुरीनिवासिनम् ।**
**आत्मविद्यागुरुं वन्दे ओङ्कारानन्दसद्गुरुम् ॥**

**२७.नामावलिः**

ॐ अकारोकारमकारनादाङ्कितनाम्ने नम:

ॐ अग्निविश्वविद्यालयसंस्थापकाय नमः

ॐ अग्रगण्याय नमः

ॐ अज्ञानध्वान्तमार्तण्डाय नमः

ॐ अद्वैततत्त्वप्रकाशकाय नमः

ॐ अनुष्ठाननिष्ठाय नमः

ॐ अनेकज्ञानयज्ञकर्त्रे नमः

ॐ अनेकशिष्यसंपूजिताय नमः

ॐ अमानित्वादिगुणसम्पन्नाय नमः

ॐ अवधूतपीठालङ्कारिणे नमः (१०)

ॐ अविद्याकृतजालनाशकाय नमः

ॐ अहङ्कारवर्जिताय नमः

ॐ आगमविद्यानिधये नमः

ॐ आर्जवादिगुणसंयुक्ताय नमः

ॐ आदिगुरुविद्यापीठस्थापकाय नमः
ॐ आत्मविद्याप्रबोधकाय नमः
ॐ आत्मानात्मविवेचकाय नमः
ॐ आर्तहृत्तापहारकाय नमः
ॐ आनन्दैकस्वरूपिणे नमः
ॐ आश्रितजनरक्षकाय नमः (२०)
ॐ इष्टानिष्टविवर्जिताय नमः
ॐ ईप्सितार्थप्रदायकाय नमः
ॐ उपायोपेयप्रतिपादकाय नमः
ॐ उत्साहवर्धकाय नमः
ॐ एकाक्षरजपप्रियाय नमः
ॐ कृत्याकृत्यविवेचकाय नमः
ॐ गम्भीराय नमः
ॐ गरिष्ठगुरवे नमः
ॐ गीताचार्यप्रियाय नमः
ॐ गीताचार्योक्तमार्गसंरक्षकाय नमः (३०)
ॐ गोसंरक्षकाय नमः
ॐ चराचरस्वरूपनिरूपिणे नमः
ॐ जप्याजप्यविवेचिने नमः
ॐ ज्ञानदात्रे नमः
ॐ तत्त्वदर्शिने नमः
ॐ तपस्विने नमः
ॐ तेजस्विने नमः
ॐ त्यक्तसर्वपरिग्रहाय नमः
ॐ दक्षिणामूर्तिकल्पाय नमः
ॐ दत्तात्रेयप्रपूजकाय नमः(४०)
ॐ दृग्दृश्यदृष्टिनिरूपणपराय नमः

ॐ द्वन्द्वातीताय नमः

ॐ द्वैतारये नमः

ॐ द्राविडभाषानिष्ठाद्वैतग्रन्थप्रबोधकाय नमः

ॐ दिव्यमङ्गलविग्रहाय नमः

ॐ धर्मनिष्ठाय नमः

ॐ धर्मप्रचारनिरताय नमः

ॐ ध्याननिर्धूतकल्मषाय नमः

ॐ धृतिप्रदायकाय नमः

ॐ नवसालपुरीविद्यापीठाधीशाय नमः(५०)

ॐ नित्यकल्याणरूपाय नमः

ॐ नित्यसन्तुष्टाय नमः

ॐ नित्यानन्दरसास्वादकाय नमः

ॐ निरवद्याय नमः

ॐ निर्भीकाय नमः

ॐ निष्कलङ्काय नमः

ॐ निष्कामाय नमः

ॐ निष्क्रोधाय नमः

ॐ निर्लोभाय नमः

ॐ पदवाक्यप्रमाणविशारदाय नमः(६०)

ॐ परमानन्ददायकाय नमः

ॐ परमार्थानन्दनन्दकाय नमः

ॐ प्रबुद्धाय नमः

ॐ प्रसन्नवदनाय नमः

ॐ पाराशर्यवाक्सूर्याय नमः

ॐ पूर्वभाषिणे नमः

ॐ बहुजनहृच्चोरकाय नमः

ॐ बहुभाषाप्रवीणाय नमः

ॐ भवभयामयतारकाय नमः

ॐ भुक्तिमुक्तिप्रदात्रे नमः(७०)

ॐ भुवनेश्वरीप्रसादलब्धजन्मने नमः

ॐ भुवनेश्वरीशिलालयनिर्मात्रे नमः

ॐ मधुरभाषिणे नमः

ॐ महाप्रज्ञाय नमः

ॐ मेधाविलासलसिताय नमः

ॐ मोक्षमार्गप्रदायकाय नमः

ॐ मौनानुष्ठाननिष्ठाय नमः

ॐ यतिश्रेष्ठाय नमः

ॐ रुद्राक्षभूषितग्रीवाय नमः

ॐ रूपातीतस्वरूपविमर्शकाय नमः (८०)

ॐ वाग्विदां वराय नमः

ॐ व्याससूत्रार्थसारदाय नमः

ॐ विकार्यब्दसमुद्भवाय नमः

ॐ वेदपुरीक्षेत्रसमाधिस्थाय नमः

ॐ वेदान्तवेद्यविबोधकाय नमः

ॐ शङ्करभाष्यप्रचारदक्षाय नमः

ॐ शरणागतवत्सलाय नमः

ॐ शान्तानन्दपरम्परागतशिरोमणये नमः

ॐ शास्त्रोद्धारकाय नमः

ॐ शिष्यहृत्पद्मभास्कराय नमः (९०)

ॐ शुद्धबुद्धमुक्तस्वरूपाय नमः

ॐ श्री दयानन्दाहृदाह्लादकाय नमः

ॐ श्री चिद्भवानन्दस्वीकृतदीक्षानाम्ने नमः

ॐ श्रृङ्गगिरिपीठाधीशप्रपूजकाय नमः

ॐ षड्रिपुसंहारकारकाय नमः

ॐ सकलकलुषनाशकाय नमः

ॐ सत्यनिष्ठाय नमः

ॐ सदात्मध्याननिरताय नमः

ॐ सनातनधर्मसंवर्धकाय नमः

ॐ सम्प्रदायवित्संरक्षणतत्पराय नमः (१००)

ॐ संसारसागरकैवर्तकाय नमः

ॐ सर्वदाभिनवचिन्तकाय नमः

ॐ सर्ववेदान्तसिद्धान्तबोधकाय नमः

ॐ सर्वसम्पत्प्रदात्रे नमः

ॐ सर्वसाक्षिस्वरूपनिरूपणपराय नमः

ॐ स्वात्मारामाय नमः

ॐ सुरभिसरस्वतीतीरवासिने नमः

ॐ हंसः सोऽहं इत्यादि मन्त्रार्थनिरताय नमः (१०८)

ॐ श्री श्री श्री ओङ्कारानन्द-ब्रह्मेन्द्र-सरस्वत्यवधूतमहास्वामिने नमः

## २८.धूपः

**चन्दनागरुधूपेन, सुगन्धो मारुतो यथा।**

**यस्य सङ्गादहं धन्यः, तस्मै श्रीगुरवे नमः।।**

**सत्पुरुषाय सद्गुरवे नमः, धूपमाघ्रापयामि।।**

## २९.दीपः

**आवृतस्वस्वरूपाणां, त्रितापक्लिष्टदेहिनाम्।**

**शास्त्रवाक्यार्थदीपेन - आवृतिनाशकमाश्रये।।**

**आवृतिनाशकाय सद्गुरवे नमः, दीपं दर्शयामि।।**

## ३०.नैवेद्यम्

क्षुत्पिपासान्धयबाधिर्य - कामक्रोधादयोऽखिलाः।

लिङ्गदेहगता एते, ह्यलिङ्गस्य न विद्यते।।

क्षुत्पिपासारहिताय सद्गुरवे नमः, इदं सर्वं निवेदयामि।।

नैवेद्यानन्तनरम् आचमनेयं समर्पयामि।

हस्त प्रक्षालनं समर्पयामि।

पादप्रक्षालनं समर्पयामि।

कण्टूशं समर्पयामि।

पुनराचमनीयं समर्पयामि।

पूगीफलसमायुक्तं नागवल्लि तलैरुतम्।

कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।

आचमनीयं समर्पयामि।

## ३१.नीराजनम्

हिरण्मये परे कोशे, विरजं ब्रह्म निष्कलम्।

तच्छुभ्रं ज्योतिषां ज्योतिः, तद्यदात्मविदो विदुः।।

ज्योतिःस्वरूपाय सद्गुरवे नमः, नीराजनं सन्दर्शयामि।।

न तत्र सूर्यो भाति न चन्द्रतारकं,

नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति।।

नीराजनान्तरं आचमनीयं समर्पयामि ।।

वेदोक्त मन्त्रपुष्पं समर्पयामि। (चोऽपां पुष्पं.....)

## ३२.स्तोत्रम्

१.श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं फलम्

आयुष्यं देह-आरोग्यं देहि मे गुरूत्तम।

२.ह्रीङ्कार्याः पादसंपूज्यं हृदयानन्ददायकम्।

ओङ्कारानन्द पादाब्जं नमामः चित्तशुद्धये।

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः,

स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम्।

न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये,

स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वा लौकिकोऽपि।।

निरुपमाय सद्गुरवे नमः, स्तोत्राणि समर्पयामि।।

## ३३.प्रदक्षिणनमस्काराः

यस्य प्रसादादहमेव विष्णुः,

मय्येव सर्वं परिकल्पितञ्च।

इत्थं विजानामि सदात्मरुपं,

तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम्।।

दुर्दर्शमतिगम्भीरम्, अजं साम्यं विशारदम्।

बुद्ध्वा पदमनानात्वं, नमस्कुर्मो यथाबलम्।।

स्वात्मरूपाय सद्गुरवे नमः, अनन्तकोटिप्रदक्षिणनमस्कारान्समर्पयामि।।

## ३४.सर्वोपचाराः

अजमनिद्रमस्वप्नम्, अनामकमरूपकम्।

सकृद्विभातं सर्वज्ञं, नोपचारः कथञ्चन।।

अव्यवहाराय सद्गुरवे नमः, सर्वोपचारान्समर्पयामि।।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत्सकलं परस्मै नारायणयेति समर्पयामि।।

अनेन मया कृत पूजया सद्गुरुः प्रीयताम्।।

।। ॐ तत् सत् ।।

।। ब्रह्मार्पणेमस्तु ।।

पूजा मध्ये मन्त्र तन्त्र स्वर वर्ण भक्ति श्रद्धा लोपदोष

प्रायश्चित्तार्थं नामत्रयजपमहं करिष्ये ।।

ॐ अच्युताय नमः ॐ अनन्ताय नमः ॐ गोविन्दाय नमः (त्रिः)

ॐ अच्युतानन्तगोविन्देभ्यो नमो नमः ।।